This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

व्या. सर्वदिक्...

॥श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः। श्रीकृष्णपरब्रह्मणे नमः॥ व्याप्तिस्वरूपज्ञाने हीति सङ्गतिसम
मी। एतस्य प्रतिपादयितुं शक्यत्वे इति नेनान्वयः। तथा च अनुमानप्रामाण्यव्यवस्थानिर्वाहकव्या
प्तिग्रहोपायनिरूपणोपजीव्यत्वेन प्रथमं व्याप्तिस्वरूपनिरूपणमिति भावः। कपिसंयोगीति। न
च साध्याभावे प्रतियोगिवैयधिकरण्यनिवेशेनाव्याप्तिरिति वाच्यं। प्रतियोगिमात्रवृत्तित्व
रूपप्रतियोगिवैयधिकरण्यघटकस्य प्रकृते साध्यवद्भिन्नत्वपर्यवसानेन तद्दोषतादवस्थ्ये यदि
[illegible] लक्षणरूपत्वात्। ननु तथापि वह्न्यभावाधिकरणतावच्छेदकताग्रहविरोधित्वग्रहविषयसं
धे नरसं [illegible] संबंध्यं। [illegible] साध्याभावस्य निरूपकत्वे निरुक्तरक्षि[illegible] विशेषणतादि
षस्ये [illegible] व्याप्तिरिति चेन्न। अत्र क्रमः। एतदाशयेनैव दीधितौ व्याप्तिमाहां
[illegible] सैवोक्तं स्यात्। तथा चाशंस्यैव [illegible] यथाश्रुतेऽव्याप्ति
[illegible] अव्याप्तेरपि दुष्करी[illegible] तदवस्थत्वात्। अत एव [illegible]
[illegible] लक्षणान्तरं न तु [illegible] अव्याप्तिरपि [illegible] पूर्वोक्तक्रियमाणस्यापि दोषस्यासंभवात् [illegible] निष्प्रयोजनं। [illegible]
[illegible] ॥ अत्र [illegible] स्यादिति। [illegible] तैयायिकाः॥ कृ. १
[illegible] पूर्वधारयं [illegible] कारे। [illegible]

Acc. NO. ~~283~~. M.1543
Title - व्याप्तिस्वरूप निरूपण (Comm. with भवानन्दी)
Author - महादेव.
Date - ?
Sub - न्याय.
folio - 56
Xerox - 110

Checked 2012

K K S U LIBRARY
RAMTEK
441 106
M.1543
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न वैयर्थ्यं। कर्मधारयपक्षे न वैयर्थ्यं। अधिकरणभेदेनाभावभेदाभावे साध्यपदवैयर्थ्यासंभवापातः। अ
धिकरणभेदेनेति। पक्ष एवेति। अन्यथाऽव्याप्यवृत्तिसाध्यकाव्याप्तितादवस्थ्यात् इति भावः। नाविवि
तथा चघपत्वाभावादिकमादाय सर्वत्र लक्षणासत्त्ववारणाय साध्यपदमिति भावः। अभ्युपेत्यारोति। यदि
चेति। अभाववमात्रस्यैव। सप्तमपदार्थरूपाभावमात्रस्यैव। तेन नाग्निमान्संभवकाद्यसंगतिः।
उपात्तं। लक्षणकृत्तु विवक्षितं। असंभवइति। यथाश्रुताभिप्रायेण। वक्ष्यमाणरीत्या साध्यवत्तानवच्छिन्ने
धिरत्महविषयसंबंधेनाभाववत्त्वविवक्षणे स्यात। अव्याप्तिर्वेति। अभाववत्साध्यकहृदसादि
लद्विवक्षणे भावसाध्यके विशेषणताविशेषस्यैव तादृशत्वेन तेन संबंधेन भावस्याधिकरणा
प्रसिध्याऽभावसाध्याधिकरणभेदेनाभिन्नतया लक्षणसंगमाऽसंभवाभावात् इति भावः। ते
नेत्यादि। अयमाशयः। संबंधसामान्येन साध्याभाववत्त्वविवक्षणेऽभावसाध्ये द्रव्यत्वाद्या
दिसंबंधमादाय व्याप्तिरिति विशेषणताविशेषेण तद्योग्यं। तस्य च भावाभावसाधारण
त्वेन घटत्वाभावादिसाध्यकेऽव्याप्तिरेव चात्र तेन संबंधेनात्यन्ताभावरूपसाध्याभावाधिक
रणोहेतौ वर्त्तसाऽव्याप्तिरूपत्वसंबंधेन तद्विवक्षणे तादृशकालिकसंबंधेन तद्धति कालोहेतौ

भा.टी.
२

रव्यसानाव्याप्तिरिति। कर्मणि चेत्साध्यतावच्छेदकमतानुसारेणाह दीधितौ कर्मादाविति। यारवा
पांसिद्धिकर्मत्वमिति। एतेन कर्मादौ विसनैनोक्तया कपिसंयोगादिसाध्यकाव्याप्त्यासाध्य
वत्प्रतियोगिकत्वेतिलक्षणावतारणमयुक्तं। कपिसंयोगवद्वृक्षान्तरप्रतियोगिकभेदस्यैतद्
क्षेसत्त्वेनात्राव्याप्तितादवस्थ्यादिति नवीनानां दूषणोद्भावनं परास्तं। साध्यवत्व
सिद्धिकर्मत्वरूपतया वृक्षान्तरस्य साध्यवत्त्वाभावात्। व्याप्त्यन्येवन्तीति। केवलान्वयिरोषे
विशिष्टस्य तदानभ्युपगमो द्वैविध्यावच्छिन्नप्रतियोगिताकान्योन्याभावमादाय न दोष
इति ध्येयं। साध्याभाववतीत्यादि। वह्निमान् धूमादित्यादावव्याप्तिरेव साध्ये साकल्य
विशेषणं कृतिः साध्यसाध्याभाववति साकल्याप्रवेशेन संभवति। यत्किंचिद्वह्न्यभाववा
वा४ भिन्नरणा यत्किंचिद्ध्रदादौ धूमाभाववत्त्वात्। तत्प्रवेशे यत्किंचिद्वह्न्यभाववत्त्व
कल्लोलगतमत्स्यान्तसाध्ये धूमाभावासत्त्वादिति भावः। वह्न्यादिसाध्यकाव्याप्तिपा
रणाय साध्येन साकल्यप्रवेशः। किंतु साध्याभाववद्वृत्तिसाधं भंगो पत्तं तदुपेक्षाबीज

सम
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माह। साध्याभाववदिति। गुणादाविति। न च संबंधस्य सामान्यावच्छिन्नप्रतियोगिताकत्वात्तत्सत्तादावच्छिन्नाभा
वस्तोपान्तर्गतो न गुणादाविति वाच्यं। प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यस्य सा
ध्यतावच्छेदकसंबंधपर्यवसिन्नप्रतियोगिताकाभावत्वघटितत्वेनाभिप्रायेणैतदुक्तेः। साध्यतावच्छे
दकसंबंधेन प्रतियोगिवैयधिकरण्यनिवेशे साधारणदोषमाह। अव्याप्तिश्चेति। प्रतियोगि
तावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यनिवेशे प्रसिद्धानुमाने उक्तरीत्या गुणादेरेवप्र
सिध्यानाधिकरणाप्रसिध्याऽव्याप्तिरित्याशयेनाह। पृथिवीत्वेति। अप्रसिद्धेरिति।
न च प्रत्येकं स्तोमाधिकरणप्रसिद्धिरस्ति इति वाच्यं। प्रत्येकाधिकरणे साकल्याप्रवेशेऽपि
प्रासंगेन तत्प्रवेशे। प्रसिद्धानुमाने महानसीयवह्न्यभावाधिकरणसकलं तत्पर्व
तादौ धूमाभावासत्त्वादव्याप्तिः। सकलवह्न्यभावेति। तार्णेति। तार्णोभयवह्न्यभावेत्यर्थः।
न व्याप्तिरिति। साध्यमात्रप्रतियोगिताकाभावनिवेशे एतद्रूपादिसाध्यके एतद्रूपजला
दुभयाभावस्याप्रसिद्ध्या तेनासंभवाभावात्तदूसाशयः। अत्रापि दोषं वदति विशिष्टाभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ॰ टी॰ र॰
२

वो विशेषणाभाव एवेत्याशयः। तेन विशिष्टाभावमादाय नाव्याप्तिः। अग्निमगंधस्तुतस्यातिरिक्त
त्वाभिप्रायेण इति न तद्विरोधः। व्यासज्यवृत्तीति। अथैवं वह्निधूमोभयवान्नवह्नेरित्यादावव
तिप्रसंगः। व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य वह्निधूमान्यतरत्वावच्छिन्न
प्रतियोगिताकाभावादेरयोगोलकादौ असत्त्वात् इति चेन्न। अयोगोलकान्यत्वविशिष्टव
ह्निधूमान्यतराभावस्यैव तादृशस्यायोगोलके सत्त्वात्। वक्ष्यमाणदोषेणोक्तस्याप्युपलक्ष
णात्। जातिमानिति। अत्रोपरक्तं तव वह्निसाध्यकानुमानस्याव्याप्तिबीजं मितिलुनाशंक्यं।
सकलसाध्याभाववत्स्य सकलसाध्यनिष्ठप्रतियोगितानिरूपकाभावे इत्यर्थकत्वे सकल
वह्नेरेकक्षणवृत्तित्वाभावेन पूर्वक्षणावच्छिन्नत्वविशिष्टवह्न्यभावस्य सकलत्वेन। किन्तु
प्रतियोगितानिरूपकत्वासंभवेन तत्राव्याप्तेरसंभवात्। अत एवाव्याप्तिरित्यपि संगा
च्छते। एकक्षणवृत्तित्वेति। अथ व्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्य प्रतियोगितायां
वैशिष्ट्यानवच्छिन्नत्वनिवेशान्न दोष इति चेन्न। तथापि वह्निधूमोभयवान्न वह्नेरित्यादावु

रम
३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविशिष्टाभावस्यासंभवात्तेनाकारी सातिप्रसंगात्। भावीत्यादिनेरिति। साध्यतावच्छेदकेति। तदवच्छि
न्नस्य व्यासज्यवृत्तिधर्मावच्छिन्नसनिवेशे तत्तिगौरवं भिसाशाय। यथाश्रुतस्य हेत्वभावप्रतियो
गिवैय्यधिकरण्याघटितस्य यथायथमिति। साध्याभाव निष्ठं साध्यतावच्छेदकसंबंधेन हे
त्वभाववन्निष्ठहेतुतावच्छेदकसंबंधेनेत्यर्थः। क्रमेण तयोः प्रयोजनमाह। तेनेति। नप्रतीतिः। नीति
व्याप्तिसंगतिः। परामर्शानुपपत्तेरिति। तत्पदस्य पूर्वोपस्थितपरामर्शकत्वेन साध्याभाववत्त्वे
न पूर्वोपस्थितत्वात्प्रतीतिभावः। विशेषणयोः। प्रतियोगिप्रतियोगित्वविशेषणयोः। प्रतियो
गितावच्छेदकावच्छिन्नत्वहेतुतावच्छेदकावच्छिन्नत्वयोरितियावत्। असत्त्वेपीति। इदमुप
लक्षणं पृथिवीकपिसंयोगादित्यादौ निरुक्तसाध्याभाववत्तिलादौ प्रतियोग्यनधिकर
णगुणादिवृत्ति कपिसंयोगाभावस्य सत्त्वेपीत्यपि द्रष्टव्यं। यत्तत्र लाघवेन साध्याभाववद्वृत्ति
भावयोः साध्यताहेतुतावच्छेदकावच्छिन्नवैय्यधिकरण्यं निवेश्य साध्यतावच्छेदकावच्छि
न्नानधिकरणयावत्तद्धर्मावच्छिन्नानधिकरणं तद्धर्मवत्त्वमेव साध्यमिति [struck] दीधितिकृद
क्तिं संगतेति। तदसत् एतस्य लक्षणान्तरत्वेन मूलोक्तप्रतियोगिव्यधिकरणस्य व्याप्तिलक्षणानुसारेणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीधितिकृदुक्तसंगतेः। नन्वेवमत्यादीति। अन्यथा यद्यपि तादृशाभावत्साध्याभाववत्तापर्वतन्च घटादौ च
न्याभावभेदस्यात्तादृशसंसर्गेण तमादाय लक्षणसमन्वये दूषणं यद्यपि तथापि प्रतियोगिता
न छेदकत्वसंबन्धेन प्रतियोगिवैयधिकरण्यनिविष्टं प्रतियोगितायां चाद्धेतुतावच्छेदकसंबं
ध्यावच्छिन्नत्वं निविष्टं। वन्ह्यभाववद्भेदश्च न तथेति तात्पर्यात् भावाव्याप्त्यसंगतिः। ननु साध्या
वतोन्यदृत्तिघटसमस्तस्थले ऽन्योन्याभावान्वितपंचम्यर्थप्रतियोगितायां प्रवृत्तसमर्थस्य स्वा
धावदादेः साध्यवत्त्वावच्छिन्नत्वसंसर्गेणान्वयात् साध्यवत्तावच्छिन्नप्रतियोगिताक
त्वेनात्रापि साध्यवदन्येत्यादिसमस्तस्थले प्रतियोगितोपस्थापकपदाभावेन तत्तृतीयास
धंबातृन तल्लाभसंभवः। न च संसर्गतया तत्तृतीयान्वयसंभवः। नामार्थयोर्भेदान्वय
स्याव्युत्पन्नत्वादित आह। अन्यत्रेति। तस्येति। व्युत्पत्तिवैचित्र्यादिति शेषः। प्रसंगादा
ह। घटेनेत्यादिकमिति। कस्यचिन्मतं निराकरोतीति। नन्विति। समवायसंबंधेन घट इत्याका
रनिरूपकत्वेनोक्तापत्तिरित आह। एवमिति। इतरविशेषणस्याविपारतंत्र्येणेतरवि
शेषणतयान्वयात् आह। पदार्थैकदेशेति। पदार्थस्य पदार्थैकदेशेन इव तस्यापि

कृम
५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दार्थे-पयसा व्युत्पन्नत्वादिति भावः । नानार्थस्थल एव तात्पर्यज्ञानस्य हेतुत्वेत्वात् । विशेषणेत्यादि ।
यत्र नीलो घटो नास्तीति प्रकृते नील इति अव्युत्पन्ना घटो नास्तीति शाब्दधीस्तत्र घटपदस्य वस्तुगत्या नी
लत्वांशे शक्तत्वेन प्रविष्टचारादृशाकांक्षत्वमुपेक्षितं । नञर्थान्वयानुरोधादात् । अवधिमत्त्वमिति । इ
दं च यदेतस्य सावधिकत्वमुपेत्य । वस्तुतः प्रतियोगित्वमनुयोगित्वं वा पंचम्यर्थो बोध्यः । अयोग्यते
भिन्नाय प्रकारत्वेन प्रतिबंध्यात्वन्यत्रमसंभववद्दृष्टान्तायेनाह । अयोग्यतेति । असंबंधत्वात् । सं
बंधाघटकत्वात् । असंबद्धत्वादिति पाठे अयोग्यत्वे असंबद्धत्वादित्यर्थः । तत्स्य । कंबुग्री
त्वां७ वादिमत्त्वस्य । अप्रकारत्वात् । संसर्गत्वेन अवच्छेदकीभूतप्रकारताभावात् । संबंधतया । संबं
ध्यत्वपर्याप्त्यधिकरणतया । तेन संबंधेन घटप्रकारकत्वादिति । एवं च तेन संबंधेन घटस्ये
वाप्रत्वविधत्वम् । अन्यापितावच्छेदकरूपवच्छिन्नत्वं प्रतियोगित्वविशेषितान्वितपर्याप्तसंसर्गि
कविषयतयैव नञ्समभिव्याहारज्ञानकार्यतावच्छेदिकात्रयाणां संसर्गत्वेऽपि तुल्यवत्त्वले
न परस्परोपश्लेषोऽपि संसर्गतायाविषयः । एतेनान्वितमस्य संसर्गत्वेऽपि अन्यापितावच्छेदक
५२ वच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिभंगः एवेति शंकानिरस्ता इत्याशयः । उक्ताभावे नञ्द्वित्वासंभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प.न्या.टी.सः
५

येनाद्विवचनानुपपत्तेराह। द्विवचनस्येति। कै साधिकरणाकं क्षापत्तेरित्यस्वरसादाह। वैशिष्ट्यादीति। अवच्छे
दकावच्छेदेनान्वये केवलघटपटयोरिति तादृशप्रयोगानापत्तेरत आह। सामानाधिकरण्येनेति।
आनीनसत्ताकव्यवस्तेति। एकार्थसमवायेन जातिवृत्तित्वस्य सत्तावांस्तेन संबंधसामा
न्येन जातिरिति तत्त्वभावस्य समवायेन जातिवृत्तित्वाप्रसिद्धेस्तदभावस्य च बोधासंभवेनाग
सभावदसाराप। प्रतियोगितावच्छेदकं। प्रतियोगितावच्छेदकरूपपर्याप्त्यधिकरणे। तादृशेति।
उभयवृत्तिधर्मः तद्धर्मितावच्छेदकापन्नं घटत्वं पटत्वं च प्रतियोगितावच्छेदकं तत्त्वे च
त्रिषु तादृशभावापन्नेषु व्यासज्यवृत्ति तेन घटत्वपटत्वयोर्विरुद्धत्वे । पिउ
भयत्वपर्याप्तिधर्मिणोः घटत्वपटत्वावच्छिन्नतया प्रतियोगितावच्छेदकपर्याप्त्य
धिकरणावच्छिन्नं तदुभयमेवेति नाप्रसिद्धिरित्याशयः। घटपटोभयमेवे
ति। प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणावच्छिन्नेन सहैव अभा

रुम
५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वस्य विरोधो नन्नु तस्यैकत्वमपि तंत्रेमित्याशयः ॥ एवमिति । पुरुषत्वे सा
मानाधिकरण्येन दंडः विशेषणं तत्र समवायेन दंडत्वं विशेषणं दं
डी पुरुषत्वं प्रतियोगितावच्छेदकं विशेषणं विशेष्यभावापन्नेषु दंडस
[illegible] दंडत्व धर्मितावच्छेदकतापन्न पुरुषत्वादिषु प्रतियोगितावच्छेदक
तापर्याप्तिरिति भावः ॥ ॥ ५ ॥ इति सर्वोपकारिण्यां पंचलक्ष
णीव्याख्यानं समाप्तिमगमत् ॥ ॥ हे हरे वमां ॥ ॥ श्री कृष्णाय नमः ॥
लक्षणयोरिति । वक्ष्यमाणेत्यादि । समानाधिकरणयोरेव व्याप्त्याकारे प्र
सिद्धानुमाने अव्याप्यसंभवादाह । सत्तावानिति । आहेति द्वितीयमिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिः। अविवक्षितं चेति। अत एवेत्यादि। अधिकरणएवयत्पदार्थस्याके स्वात्मव्यक्तं नसाध्येद्
सत्त्ववत्सादाहरणादित्यादिति। असामानाधिकरण्य प्रतियोगित्व स्वस्वसामानाधिकरण्य एव
सत्त्वेनातिप्रसंगादाह साध्यनिष्ठाव भावेति। निष्कर्षमाह। साध्यनिष्ठाभावीये
ति। निष्कर्षप्रयोजनमाह। इत्थं सत्त्वादिति। अन्यथा द्रव्यत्वे सत्ताधिक
रणे स्वधिकरणावृत्तित्वाभावेनातिप्रसंगः स्यात् इति भावः। सिद्धिकर्मत्वं सा
ध्यत्वमित्याशयादाह। पर्वतीयवन्हाविति। साध्यतावच्छेदक
व्यापकत्वस्वरूप साध्यनिष्ठत्वोक्ताव व्याप्तिवनावादाह ॥ किंचे
ति ॥ यत्किंचित्संबंधेन [illegible] आधेयत्वोक्ताकुत्रदोषाभावादाह ॥

||

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सम्पादनेति। तेन व्यापकतावच्छेदकत्वविरहलक्षणेन प्रमेयत्वादिनेति। द्वितीयपक्षे आश्र
यमादाय व्यभिचारवारणाय तद्वन्निष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वं व्यापक
त्वरूपत्वादिति भावः। अत्रैवेत्यादि नोक्तस्य सामान्यपदार्थत्वेन तत्कथनमात्रं। आर्द्रेन्धने
ति। ननु साध्याधिकरणवृत्तित्वाभाववदवृत्त्यादौ संबंधसामान्येन निरूपित साध्याधिकरणतावच्छि
न्नाधारतैव वह्निमान् धूमादित्यादौ द्रव्यत्वानाधिकरणगुणादौ हेत्वधिकरणताया अवच्छिन्नाधारता
वत्त्वं न संभवति किंतु समवायादिना गुणादौ हेतौ। तुल्यतावच्छेदकसंबंधनिरूपितहेतु
तावच्छेदकावच्छिन्नेति। तेनेति। निरूपिताधिकरणतासामान्याभाववत्त्वं निरूपितहेत्वधि
करणतासामान्याभाववत्त्वं नियतेनैवेत्यर्थः। वह्न्याद्यधिकरणत्वाभाववत्त्वस्य तत्सामान्याभा
वत्वनामिवेष्टमिति। प्रकृते तत्वाभावादिति शेषः। तेनेति। तत्संबंधावच्छिन्नाधिकरण
तासामान्याभावत्वात्प्रतियोगितावच्छेदकाभावात्तत्प्रतियोगित्वस्य वह्न्यधिकरणताभा
वत्वेनाति व्याप्तिरित्यादि भावः। अनतिप्रयोजनकत्वादिति। ननु वह्निमान् आका
शात् संयोगेन रूपादिमत्त्वादित्यादौ प्रसंगवारणमस्त्येवेति प्रयोजनाभावात् वाच्यं। पक्षधर्म

(९)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

12

भ·टी·स·
७

ति ३

तावत्सादेवनन्यावृत्तित्वकारणे व्याप्तित्वेऽपि श्यति विरहत्साध्याभावात् । साध्याभावाधिकरणे
साध्यमूलव्याप्तिः ... निरूपकलक्षणायां नुपादेयत्वे सा लक्षवेतलदन्दु वादको ग्रंथयथाक्ष
ललक्षणापर्यवसाध्येवादेरिसादि नादीधितौ कृतं अनुवादं स्फुटमिवं साध्याभाव
ाधिकरणे साधिमूलमपर्यवें व्याचष्टे साध्यविशिष्ट तदभावदर्शति । प्रथमलक्षणवाक्या
र्थ इति शेषः । समीसेन ओमप्यापि वेशास्याव्युत्पन्नत्वाद् । व्युत्पत्तिवैचित्र्यादिति । घटा
नाधिकरणेपि साधनत्वोपे नव्युत्पत्ति संकोचस्यावश्यकत्वादिति भावः । व्युत्पत्तिसंकोचम
पाहन न न्यस्य साक्षादिति । द्वितीयेपि । द्वितीयलक्षणेपि सएव । तद्वितीयलक्षणे न क्र
व्यं सा सनन्नि वाहिन ओमप्यापि वेशस्यकापि दोषत्वं न स्यादित आह यत्स्वतरिक्षितेति । प्र
तियोग्यनधिकरणे साततायेति । आदिना साध्याभावववदवृत्तित्वमिति साध्यविशिष्ट तत्वः ।
यद्विंचिदिति निरूपकत्वेऽन्यितं साध्यवद्भिन्ने । तत्सावच्छेदेन तेन नातिप्रसंगः ।
आकाशादेरित । अवच्छापिकरण संबंधव्यैवावच्छेदकत्वादिति भावः । विल
क्षणं । व्यापकत्वार्थ द्विदोषपसंजनकत्वमवच्छेदकताविलक्षणं स्वीकार्यं इति । यत्तु हेत्वाधि कृष्ण
७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारणावच्छिन्नत्वस्यावच्छिन्नत्वहेतोः साधिकरणावच्छिन्नत्वाभावोऽन्यथाभावे रूपनपातहरुची प्राहे न दोषइति
नवीनैरुक्तं। तदसत्। तथात्वे लाघवात् दोषेनैव ताद्रशापत्तावप्रतिबिंबितत्वे विशेष्यतांतरेण च नैया
मपर्यंतानुधावनैस्यादित्यदोतो वैय्यर्थ्यापत्तेः इत्याशयेन प्रावैति। तथा। अन्यथा नादिसाधिकरणं घोसा
नितं। तथा नीलकविवक्षयोपिनाविशिष्टसत्तोऽभावाऽद्भुतात्प्रवत इति प्रभावः। विशिष्टस्यातिरिक्तत्वादिना
पि विशिष्टाधिकरणतानाभ्युपिगमेन तत्रस्यावयवापेक्षया सादोतह। विशिष्टस्येति तदुक्तं श्लो तथापि
वच्छिन्नत्वसंभवनवे न प्रकारांतरेणाव्याप्तिनिरासासंभवे यदृच्छया स्वेत्साकांत। कश्चिदिति। न इव्य त्वे
गुणादृत्तादिदर्शे तारिकेः। न चाकिदिव्यत्वे गुणावच्छेदेन पृथिवीवृत्तिसमानाधिकरणाभावप्रतियोगित्व
स्यावच्छेदकत्वादत आह। द्रव्यत्वस्येति। गुणोति। निरागुणेऽसत्त्वं। तिनेनन्यगुणेऽप्यवच्छेदकत्वस्येति न २
द्विनष्टेति। एवं सत्तावाभिन्नत्वादिप्रतीतेरन्यथोपपादने न समानाधिकरणप्रत्यक्षं चावच्छिन्नत्वात्मा
वे भवच्छेदकत्वाभावस्येवेति। एवकारेण द्रव्यत्वावच्छेदेन वृत्तेरसंयोगाभावे स्वावच्छेदः। निरा व
रणत्वावच्छेदकत्वाभावे इति त्वयो: प्रत्यक्षानभ्युपगमात् आह। कदाचिदिति। तदभ्युपगमे इत्यर्थः। दीधि
तावतिप्रसंगाद्येति। यद्यतींद्रियहेतावतींद्रियसाध्यघटितसाधनापि कारणताग्राह्या स्यात्
तदापि करणाभावे न्यायव्याप्तिरिति कथमनुमितिप्रसंगः। तथापि अतिप्रसंगात्सिद्धिर्विषयो

अतिप्रसंगात्संदेहो दुर्वार एव स्यादिति भावः ॥ एवं प्रमाणाभावेऽप्युक्तस्य संशयस्य मानाभावेऽपि करणत्वाभावस्यापि
लिंगं तदधिकरणविशिष्टं अनुमानस्य चेति। गगनादि संयोगः अव्याप्यवृत्तिः संयोगत्वादूपवि
संयोगवदित्यनुमानस्य च। ऐन्द्रियकसंयोगस्य संयोगत्वावच्छेदेनैव व्याप्यवृत्तित्वं न हादत्तैन्द्रि
यसंयोगस्यापि तथात्वसिद्धेरित्यर्थः। किं चेति। कुतः। कस्मात्प्रमाणात्। अनुमानादितीति।
अनुमानाभावः। गुरुत्वस्यानवच्छिन्नवृत्तित्वादित्याद्यनुमानादिसिद्धः।
त्वतएव। अनुमानादेन। इदमित्यादीति। एवं च कालिकविशेषणतया गुरुत्वाद्यभावोऽपि दि६
विशेषणता वैलक्षण्यसूचनाय। नन्वस्वरूपसंबंधेन कालवृत्तौ कालत्वाद्यवच्छेदेन व७
अवच्छिन्नवृत्तिसंबंधानुरोधेनेति ॥ एतेन न वृत्त्यानवच्छिन्नवृत्तिकत्वं सत्त्वेनैव। ननु गग
गनादिरूपाद्यत्यन्ताभावस्यानवच्छिन्नत्वेऽपि महाकालरूपायतनावच्छिन्नवृत्तिकत्वावच्छिन्न
त्यमेवेयत्तामात्। तादात्म्येन तस्य संबंधितयैतस्मिन्नभावतो तादात्म्येति। व्यक्तिविशेषावच्छ
संबंधेनावच्छेदकाधिकरणसंबंधस्यैवावच्छेदकत्वादिति भावः। अव्याप्येति। अधि
करणभेदेनौभिन्नभेदाभावान्नादिति भावः। अव्याप्यवृत्तिलैकरूपादिवृत्तित्वाव
च्छेदेन हेत्वधिकरणावच्छिन्नत्वं। धूमवत्तित्वावच्छेदेन तदभाव इति टीका। कृष्ण
८

15

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नत्वेन तदभावेति। तथाच वह्निमत्संयुक्तत्वाभावे हेत्वधिकरणावच्छिन्नसाध्याभावप्रयुक्तोभयाभावस
त्त्वान्नाव्याप्तिरिति भावः। अतिप्रसंगादिति। धूमवत्संयुक्तत्वाभावे वह्निवृत्तित्वावच्छेदेनायोगोल
कावच्छिन्नत्वस्य लोपनोक्तादिवृत्तित्वावच्छेदेन तदभावसत्त्वेनोभयाभावसत्त्वादिति भावः।
नदोषइति। कालोघटवान् पटादिसाध्ये[illegible]वच्छेदेन पदोन्नमाने कालवृत्तित्वाभा
वेकालस्यानवच्छेदकत्वात्तल्लक्षणसमन्वय इति भावः। ध्वनिष्ठत्वं साध्यवद्वृत्तित्वे। विशेषणाभि
तित्वांसाशंकते। नचेति। ननु धूमवद्वृत्तित्वे इति। तथाच स्ववृत्तित्वेऽनवच्छेदकत्वं विवक्ष
णीयं इति भावः। अत्र। अपरे त्वितिमते। गुरुचरणा इति दूषणं वदंतीति शेषः। अव्याप्ति
रिति। हेतोः साध्यवत्कालादिवृत्तित्वे नत्वनिष्ठसाध्यवद्वृत्तित्वाघटनाप्रसक्तेरिति भावः। ननु
कालादौ कालिकादिसंबंधेन वृत्तित्वेपि तुलावच्छेदकदैशिकसंबंधेनावृत्तित्वया नाप्र
सिद्धिरत आह। तत्रेत्यादि। तस्य परमाणुसाध्याभावस्य। तादृशेति। दैशिकसंबंधघटिते
सर्पः। ननु परमाण्ववच्छेदेन तत्र कालादिवृत्तित्वाभावसत्त्वात्तदनाप्रसिद्धिरत आह।
परमाणौ चेति। संबंधेनाप्रसिद्धीति। अपि ना दैशिकसंबंधसमुच्चयः। तस्य। परमाणु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वाभावस्याऽवृत्तेरिति। कालिकसंबंधेन कालत्वव्यापकस्य परमाणोरकालत्वेन तेन तत्राव्याप्यवृत्तेरित्यर्थः।
तदेव विवृणोति। परमाणोरिति। तथा च कालावच्छेद्याधिकरणसंवृत्तता परमाणोर्नावच्छेदप्र
त्ययितिभावः। अतिरिक्तस्येति। संयोगाद्यतिरिक्तस्येत्यर्थः। संयोगादीनामिहेति प्रत्यय
नियामकत्वे इह घटः भूतले घट इत्यादिप्रतीतिवैलक्षण्यमनुपपन्नमित्याशयेनाह।
यदि चेति। तथा प्रतीतिः। इहेति प्रतीतिः। न चेहेति। इहेति परमाणुविशेषणं। इत्थं
च्यत इति। तथा च नोक्त[illegible]व्याप्तिरिति भावः। अव्याप्तिरिति। हेत्वधिकरणा
वच्छेदेन स्वाश्रयस्मिन् साध्यवद्वृत्तित्वस्य सत्त्वेन स्वातंत्र्य साध्यवद्वृत्तित्वाभावाप्रसि
द्धेः। हेत्वधिकरणकालाद्यवच्छेदेन तत्सत्त्वेऽपि सिद्धिं निराकरोति। [illegible] तात्पर्ये ति।
गुरुचरणोक्तदूषणमुद्धरतामपरेषां मतम्। तैः परिष्कृतवतां मतमाह। परे त्विति।
ति। सम्यगिति संतेन। हेत्वधिकरणस्येति। हेतुतावच्छेदकसंबंधेनेत्यादि।
वान्निमान् धूमादित्यादौ हेतुतावच्छेदकसंयोगेन वह्निमानिति नौकादौ हेतुद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घावच्छेदेन वर्त्तमानस्य वह्निमत्त्वं प्रकृते यो घटाभावस्तस्यानवच्छेदकं धूमाद्यधिकरणमिति लक्ष
णसमन्वयः । पार्थिवपरमाणुवृत्त्यादिति । अनेन पार्थिवपरमाणोरवच्छेदकत्वमुक्तं । ना
द्रत इति । हेतुतावच्छेदकसंबंधेन यन्निष्ठमधिकरणमित्यर्थः । एवमिति । आकाशवृत्तौ तादृश
घटत्वाभावे वर्त्तमानस्य काशत्वाभाववत्त्वं तदभावस्य अनवच्छेदकं हेत्वधिकरणं घ
टादीति भावः । द्रव्यत्वरूपेण । पर्वतीयधूमस्य कालिकसंबंधेन महानसवृत्तितया पर्व
तीयधूमवृत्तिवह्निमत्संयुक्तत्वाभावावच्छेदकत्वं हेत्वधिकरणमहानसस्येति रीत्या । इ
दमुपलक्षणं । वह्निमान्धूमादित्यादौ धूमादिसंयोगिनः कपालादेर्घटादिनिषेध
वह्निमत्संयुक्तत्वाभावावच्छेदकत्वेनेत्यपि द्रष्टव्यं । अनवतीति । इदमुपलक्षणं । कपा
लादेः संयोगेन तद्धूमानधिकरणतया नाव्याप्तिरित्यपि द्रष्टव्यं । विशेषरूपेण संबंधता
स्वीय व्यपगमे स्वरूपसंबंधेन हेतावुक्तपरमाणुत्वाभावादव्याप्तिरसेत्यत आह । यद्वेति ।
यद्वा वह्निमान्धूमादित्यादौ संयोगेन वृत्तिमतीति नौकादौ कदाचिदवच्छेदेन वर्त्तमान
स्यावह्निमत्त्वं प्रकृते यो घटाभावस्यानवच्छेदकं संयोगेन नौकादेर्धूमो देश्याधिकरण
मत्र सिद्धमत आह यद्वेति । धूमावयवाद्यवच्छिन्नधूमवत्स्याभावो यादृशास्ति कारणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का.टी.स.
१

यत्स्वाधिकरणावच्छिन्नेति। स्वाधिकरणत्वं हेतुतावच्छेदकसंबंधेन। एवमग्रेऽपि। धूमादिवृत्ति
वह्निमद्वृत्तित्वं ह्रदवृत्तित्वाद्धूमप्रागभावमादायासंभवादाह स्वाधिकरणावच्छिन्नत्व
साध्यताबेति। परमाणुत्वाभावादौ चेति। एतस्य घटादिवृत्तित्वाभाववद्ध्रदमनेन नाव्याप्तिरि
त्यनेनान्वयः। यद्वेति प्रथमपक्षानुसारेणाह। व्यभिचारवत्तीति। उत्पत्तिकालस्य
उत्पत्तिकालस्यापि। यत्किंचिदादि। अत्रोत्पत्तिकालावच्छेदेन तस्य पर्वतह्रदमनेनान्वयः। इत्यु
दावेति। आदिना रूपादिसाध्यकपरिग्रहः। तस्माद्वह्निमान्धूमादित्यत्राव्याप्यभावेन
धवानुपधिवीत्वादिसाध्यकव्याप्तिरेवायथोक्तमेव। हेत्वधिकरणमात्रावच्छिन्नत्वघ
टितोक्तलक्षणमेव। अत्र परे त्विति सत्त्वरसोद्भवनं तद्बीजं तु अपरे त्विति मतेऽग्रक
रणोक्तदूषणोक्तदूषणोद्धारेऽपि धूमवान्वह्नेरित्यादावतिव्याप्तिः। अयोगोलकीय
वह्निनिष्ठस्य धूमावच्छिन्नत्वाभावस्याव्याप्यवृत्तितया अयोगोलकावच्छिन्नत्ववह्निवृत्ति
त्वाभावात्। न च तादृशाभावाप्रसिद्ध्या नातिव्याप्तिरिति वाच्यं। अयोगोलकीयवृत्ती
महानसाद्यवच्छेदेनायोगोलकावृत्तितया तस्याव्याप्यवृत्तित्वेनायोगोलकवह्नित्वा

रूप
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भावस्यैवनाहरात्वात्। नचव्यापकत्वेरप्यवच्छिन्नत्वमतेनेदं संबंधारैतैणवर्तमानइसत्कजोक्त
युक्तेरितिवाच्यं। निर्युक्तिकत्वेन तन्मतस्यानुपादेयत्वादिति। इतिप्रतीतिबलात्। पर्वतसं
बंधिरूपेनवह्निमत्संयुक्तत्वाभावावगाहिप्रतीतिबलात्। पर्वतरूपयोरपीति। आपिःस
मवायइसनंतरयोज्यः। तथाच पर्वतरूपयोः समवायोपीति । अन्यथासंबंधस्यान
वच्छेदकत्वे। तथाचेत्यादि। धूमादिति संयोगे वह्निमत्संयुक्तत्वाभावावच्छेदकत्वादव्याप्ति
रतो हेत्वधिकरणमित्युक्तेति। कुतः देरपि कालिकादिसंबंधेन हेत्वधिकरणत्वात् हेतुताव
च्छेदकसंबंधेनेति। कालोधरवान् पटादिः तत्रापि कालिकसंबंधे कालत्ववृत्तिसा
भावावच्छेदकत्वाभावोऽस्त्येव तत्र तंतुपटसमवायादेः पटपरमाणुदैशिकसं
बंधादेर्वा पटादिवृत्तित्वाद्यवच्छिन्नकालवृत्तित्वाभावावच्छेदकत्व
त्वादिति नाव्याप्तिरिति ध्येयं। शेषमिति। हेत्वधिकरणमत्रासादिनिष्ठसंयो
गे धूमवत्संयुक्तत्वाभावावच्छेदकत्वाभावादतिव्याप्त्युक्तहेतुतावच्छेदकसं
बंधत्वावच्छेदेनेति वक्तव्यं। एवमुभयाभावादिकमादाय...ति व्याप्तिवारणाय

20

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ.टी.स.
११

साध्यवद्वृत्तित्वाभावावच्छेदकत्वत्वावच्छिन्नाभावो वाच्यः। तथा च निरुक्तहेतुतावच्छेदकसंबं
धवद्वस्यभावप्रतियोगितानवच्छेदकसाध्यवद्वृत्तित्वाभावानवच्छेदकत्वत्वावच्छिन्नाभाव
त्वं वक्तव्यमित्यर्थः। समवायस्यैकत्वेन गुणत्वसमवायस्य द्रव्यत्ववद्वृत्तित्वाभावावच्छेद
कत्वे पृथिवीत्वसमवायस्यापि तदवच्छेदकत्वेन द्रव्यं पृथिवीत्वादित्यादाव व्याप्तिर्नो
घवेन निरुक्तहेतुतावच्छेदकसंबंधवस्यभावप्रतियोगितानवच्छेदकसाध्यवद्वृत्ति
तावच्छेदकत्वत्वकत्वस्यैव सम्यक्त्वे त्यस्य स्वरसादाह। आकृतिरिति। अत्रेदं बोध्यं व्या
पकत्वेनावच्छिन्नत्वं तस्य निर्युक्तिकत्वेपि हेतुतावच्छेदकसंबंधेन स्वाधिकरणा
तिरिक्तानवच्छिन्नस्य वस्यभावप्रतियोगितानवच्छेदकहेतुतावच्छेदकसंबं
धावच्छिन्नसाध्यवद्वृत्तित्वत्वकत्वमिति टीकोक्तलक्षणपरिष्कारः। संभव
त्येवेति। मान्यास्तु कालएव साध्यासामानाधिकरण्यप्रसिद्ध्या नाव्याप्तिः।
तादात्म्यादिव्यस्यानियामकसंबंधस्याप्यवच्छेदकत्वानियामकत्वात् कृष्णमन्यथा कृष्ण
११

21

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शरीरत्वेनैव्याप्यादेर्ज्ञानत्वाद्यवच्छेदकत्वं संबंधांतरेणावच्छेदमानइत्यादिग्रंथस्तु पक्षलक्षणपरइ
त्याहुः। केचित्तु। हेत्वधिकरणावच्छेदकत्वाभावावच्छिन्नत्वोभयाभावविशिष्टा याः हेतु
तावच्छेदकसंबंधावच्छिन्नसाध्यवद्वृत्तित्वाभावाधिकरणतातदभाववत्त्वमुक्तलक्ष
णार्थः। कालोघटवानित्यादौ चाव्याप्तेः तादृशाधिकरणताप्रसिद्धेरिति नाव्याप्तिरित्याहुः।
तन्न। गगनादेरपि कालवृत्तित्वेनोक्ताव्याप्तेर्वज्रलेपत्वादित्यादिक्॥ ॥इति
श्रीमन्महादेवपंडितविरचितायां सर्वोपकारिण्यां भवानंदीव्याख्यायां सिंहव्या
घ्रलक्षणं॥ ॥श्रीरामकृष्णाभ्यां नमः॥ ॥छ॥ ॥श्रीयदुकुलोत्तंसाय नमः।
॥समवेतेति। अनेन समवायप्रतियोगित्वस्य व्यधिकरणत्वनिरासः। समवायिनि
चेति। अनेन समवायानुयोगित्वरूपसमवायित्वस्य तन्निरासः। न व्यधिकरणः।
इष्टात्व व्यधिकरणः। साध्येति। तथा च शक्तिज्ञानहेतुतायां व्यभिचार इति भावः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इष्टत्वेनेश्वरेच्छायाः शाब्दप्रयोजकत्वे व्यभिचाराभावादाह। अतिप्रसंगादिति। लक्ष्यार्थे वाच्यत्वाप
त्तिप्रसंगादित्यर्थः। ईश्वरेच्छायाः सर्वविषयकत्वेन तीरादेस्तस्याः सत्त्वादिति भावः। पदार्थेत
रमिति। विषयतासत्त्वादिवदिति भावः। न चेति। वाच्यत्वस्येति शेषः। तत्पदेति। तत्स्वरूपाकृत्य
विशिष्टबोधविषयतायाः सर्वत्रसत्त्वादिति भावः। विशिष्टस्यानतिरिक्ततया तद्विशिष्ट
स्यापि संगतमिति दूषणोऽस्य त्वेवं दूषणांतरमाह। एकत्वेनेत्यादि। यद्यदर्थबोधकत्वप्रकारक
त्वावच्छिन्नेश्वरेच्छा यत्र यत्र यद्यदर्थसंबंधः स्यात् तत्तदर्थे शक्तिः लक्षणायां च
तस्याः संबंधत्वं क्वचिदेव कस्यचित्तादृशेच्छासंबंधेन तत्तदर्थवत्त्वमेव तच्छक्तेस्त
मिति फलितमिति न घटशब्दस्य पटे शक्तत्वप्रसंगादित्याशयः। वक्ष्यमाणेति।
प्रतियोग्यवच्छिन्नेश्वरेच्छाव्यतिरेकित्वेन वक्ष्यमाणेत्यर्थः। साधनेनो लक्षणेति। सा
वैभोमोच्छेदकघटितलक्षणे इत्यर्थः। प्रमेयत्वसाध्यकेऽसत्यप्रमेयत्वाद्यवच्छिन्नसाध्य
क इत्यर्थः स्वरससिद्धमनासन्निधायाह। यद्वेति। एकावच्छेदकेति। यत्किंचिदेकावच्छे
दकेत्यर्थः। घटत्वेन घटस्याभावपटत्वेन घटाभावाद्यौरैक्येऽपि प्रतियोगितावच्छेदकभेदेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतियोगितयोर्भेदान्न दोषः। अवच्छेदकत्वविशिष्टैककालान्वयेनावच्छेदकताया ऐक्यत्वाभावेन घटत्वेन
वह्न्यभाव घटत्वेन पटाभावप्रतियोगितयोरैक्यापत्त्यवच्छेदकताया वैलक्षण्यान्न दोष इति भावः।
अवच्छिन्नमात्रवृत्तितानियामकेति। अवच्छिन्नमात्रेण यावृत्तिता तन्नियामकेत्यर्थः। कालिकसंबं
धस्तु न तादृश इति भावः। प्रमेयमात्रस्येति। गगनमात्रस्य प्रतियोगित्वावगाहने नोपपत्ते
रिति भावः। गगनत्वेन प्रमेयसामान्याभावस्य केवलान्वयित्वाभ्युपगमे नाविरहेन सर्व
त्र तथाविधाभावप्रतियोगित्वसंभवात् आह। तथात्वेऽपि येति। प्रमेयमात्रस्य प्रति
योगित्वावगाहनेऽपीत्यर्थः। व्यधिकरणेति। वह्नित्व...त्वादिना प्रमेयाभावीयघटादिनि
ष्ठप्रतियोगितायां वह्नित्वादिरूपव्यधिकरणधर्मावच्छिन्नत्वा[illegible]दिति भावः।
तथाविधाभावगगनत्वादिना प्रमेयाभावे। तेन संबंधेनेति। संयोगादिरूपव्यधिक
रणसंबंधावच्छिन्नप्रतियोगितावच्छेदकता प्रमेयाभाव इति भावः। सोऽदन्तोपा
धाये व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकात्यन्ताभावेऽवृत्तेर्दस्याभ्युपगमे तादा
त्म्येन प्रमेयादि साध्यके विरुद्धत्वपक्षे न यावच्छिन्नप्रमेयादिभेद एव तत्प

29

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प.टि.स.

93 तिं घटे वं। पारिभाषिकमेवेति। पारिभाषिकत्वं चाधुनिकसंकेतशालित्वं स च संकेतः। संके
ताख्यकृतामितरेषां च तत्रास्ति यथाऽऽकाशादौ पक्षतादिपदस्य घटः। चैत्रादौ चैत्रादिपद
स्येति द्वितीयः। प्रकृतेपि च स्वाक्षिप्त वक्ष्यमाणव्याप्तिस्वरूपे अव्यभिचरितत्वपदसंके
तस्याधुनिकत्वेन पारिभाषिकत्वोपपत्तिः। इदं च पारिभाषिकत्वं रूढत्वस्य व्याप्यं रू
ढत्वस्य नैमित्तिकपारिभाषिकौपाधिकत्वेन त्रैविध्यात्। अत रूढमेवेति नोक्त
योगानादर इति। न च व्यभिचरितत्वपदस्य वक्ष्यमाणव्याप्तिस्वरूपाभावे संकेतमभ्यु
पेत्य गम्याव्यभिचरितत्वपदस्य पारिभाषिकत्वेन यौगिकत्वं संभवत्येवेति वाच्यं। लाघ
वेन साध्याभाववद्वृत्तित्व एव व्यभिचरितत्वपदसंकेतेनाव्यभिचरितत्वपदस्य पा
रिभाषिकत्वेनोपपत्तौ यौगिकत्वाभावेपि नक्षतिरित्याशयात्। अत एव तत्र योगा
।ति भावदूषणमुपेक्ष्य योगानादरस्यैवोक्तमिति ध्येयं। अपयात्येति। स ह्येतत्संपन्नघटे हेतो
सत्वेन तद्द्रव्यं विशिष्टसत्त्वोदिपादौ नाव्याप्तिसंभवादिति भावः। स्ववैशिष्ट्यस्य
संबन्धविशेषानियंत्रितत्वेन तत्र हेतुसमानाधिकरणस्य द्रव्यत्वाद्यभावस्य कृष

93

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कालिकादिसंबंधेन स्वविशिष्टहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणसमानकालादेरेव प्रसिद्धेरतस्त
द्रूपेसितं । अत एव विशिष्टधीनियामकविशेषणस्येव संबंधत्वादेव न संबंध इति जपाकुसुमादि
सांनिध्येपि लौहित्ये घट इत्याद्यप्रसंगादिति भावः । किंचिदिति । लौहित्यः स्फटिक इत्यादिप्रतीते
रितिभावः । एतेन एककालीनत्वादेः सर्वत्र संबंधत्वाभ्युपगमेन वैयर्थ्यमिति [illegible] । अत आत्मा
ज्ञानादिस्यादवच्छेदककालीनत्वादिसंबंधेनात्मादावात्मत्वाद्यभावस्यासत्त्वेनाव्याप्त्यभावादि
तिभावः । प्रसक्तमिति [illegible] । आत्मादावात्मत्वाद्यभावस्य विशिष्टबुद्धेरन्वयेनैकका
लीनत्वादेः संबंधत्वाभावादिति भावः । द्वितीयलक्षणे साध्यतावच्छेदकावच्छिन्नव्यापक
तावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्य निविष्टतया तदप्रसिद्धिप्रायेणाह । प्रमे
यवानिति । तादृशस्य । साध्यसमानाधिकरणस्य । तत्र । साध्यसमानाधिकरण्यं तस्य ।
तानस्य । तादृशाभावस्य साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताक
स्यसमवायादिनाद्यधिकरणवृत्त्यभावस्य । प्रतियोगीति । व्यापकतावच्छेदकरूपावच्छिन्नविषयतास्य
त्वादिः । अवरूपमिति । साध्यतावच्छेदकसंबंधेन साध्यनिष्ठव्याप्यत्वनिवेशेपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ·दी·स·
१५

त्वादि विवक्षणीयत्वेनेति। एतत्त्व समवायेनाभिरुपाति। अभावस्य तादृशाभाववृत्तिसमवायेन निरू
कव्यापकताघटकतया न संबंधांतरगतेनेत्यादिः। तो सगिरिविषयत्वरूपत्वे कस्य संबंधस्य
तंभवादाह। यद्दीत्येति। व-न्हिमान् धूमादि। एतादृशसाध्यनिमानक संबंधेन साध्यतायां नि
ये ते न संबंधेन साध्याभावेन निरूपकसापकता घटकसंबंधाप्रसिध्याभावेनासंभवना
संभवमावादाह। अव्याप्तिरिति। व्यापितनिरूपकत्वरूपव्यापकत्वानिवेशे आसाध्यपादिवं।
गौरवं चेत्साशयेनाह। चरणं चेति। तेन साध्ये साध्यतावच्छेदकावच्छिन्नत्वानिवेशेन धू
मव्यापकतानवच्छेदकत्वेपीति। चालनीयन्यायेन तत्त्वं सामान्यप्रतियोगितानां निरू
कभावप्रतियोगितावच्छेदकत्वमादित्याशयः। नन्वेवं वह्निमान् धूमादिसाध्ये घटत्वादिना
वत्साघभावस्य लक्षणघटकतया कथं लक्षणसमन्वय इत्यत आह। वह्निमानिति। समवायेन
त्वेनेति। यद्यपि समनियताभावभेदाभिप्रायेणैव प्रथमलक्षणमित्यस्याग्रे स्फुटतया अप्र
सिध्यापि नमसंगतं तथापि समनियताभावे व्याप्यदूषणगमकवादे न द्वितीयलक्षणे प्रति
योगितानवच्छेदकरूपार्पणतादृशव्यापकतावच्छेदकत्वस्यैवानिवेशनीयतया तदभिप्रायेणैव
तदसिध्यानसंगतिर्बोध्या। नचात्र वैरिशीघ्र्यासन्नचित्यमानवह्निन्याभावमादाय कृ·भ·
१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अप्रसिद्धिः कुतो नो के ति वाच्यं । प्राचांमते विशेषणाभावा द्यतिरिक्तस्यैतस्याभावेऽप्रसिद्धत्वात् । ना
पि प्रतियोगितेति । ननु चैवमपि गोत्वाभावादेः प्रमेय त्वेन गोत्वं नास्ति किमपि नास्तीति प्रतीति सिद्धाभा
वस्य नैयसि न न दात्मकत्वया प्रतियोगितावच्छेदक प्रमेयत्वावच्छिन्न समानाधिकरण । तथा
प्रतियोगिव्याधिकरणाभावाप्रसिद्धिरस्त्येवेति चेन्न । समानियता भावे न्यमतेपि प्रतियो
गितावच्छेदकभेदेन प्रतियोगितायाः भेदे नया दृशप्रतियोगितावच्छेदकावच्छिन्न समानाधि
करणत्वं साध्यवन्निष्ठाभावेत्यादृशप्रतियोगितानवच्छेदकत्वे तात्पर्येणादोषात् ।
संबंधविशेषानियंत्रितत्वेति । इदं च वह्न्यादिकमादाय प्रेसो कं न तु वह्न्याभावस्य
संबंधविशेषानियंत्रितत्वेति । इदं च वस्तुगतिमादाय प्रेसोक्तं न तु वह्न्यभावाभावस्य
योजनकृतया । तेन व्यापककस्य प्रतियोगितावच्छेदकसंबंधादिरूपसंबंधविशेषानि
यंत्रितत्वेपि वक्ष्यमाणासंभवादिदोषसंगतावपि विशिष्टकापाअनवकाशः । ननु तदेवेति
तथा चसंयोगेन द्रव्यत्वाभावस्य प्रतियोगिवैयधिकरण्याभावत्वे विन संयोग
न द्रव्यत्वस्य चाक्रियापकत्वापत्तावतनोत्करीत्या संबन्धविशेषः । तद्भिन्नत्वसाध्य
न द्रव्यत्वस्य चाक्रियापकत्वापत्तावतनो त्करीत्याऽसंभवदृशाविना चः । तद्भिन्नत्वसाध्या
भाविति । तथा च तद्भिन्नमण्डांवां तरमेवेति । संयोगेन द्रव्यत्वसस्य चानि ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्या·टी·स·
१५

[illegible]

पकृतपाऽसंभवत्वाद वस्थामितिभावः। एवं संयोगे न द्रव्यत्वाभाववस्य घटत्वे न वक्षमाभावा
भिन्नत्वे। एवमपि द्रव्यत्वाद्यभावाऽसंभवाभावेपि। उत्क्रमेण संयोगे न द्रव्य त्वाधिकरणा
प्रसिध्ये। साधुत्क्रमेण। तेन संबंधेन। व्यापकता घटत्वसंबंधेन। संयोगादेरपीति।
संयोगाभावादेः प्रतियोगि वैयधिकरण्याभावेन तादृशाभावो तत्प्रतियोगितावच्छेदकत्वाभा
वः। व्यापकतायाः। समवायेनेत्यादिः। प्रतियोगीति। व्यापकता घटत्वसमवायेनेत्यादिः।
तदर्थश्चेत्साध्यत्वे पोपपत्तिसपाद्यते। नतत्स्मादिति। यत्संबंधत्वसामान्ये यत्संबंधात्व
स्यावच्छेदेन अवच्छिन्न. तत्संबंधव्यापकत्वं तस्य चोभयाभावेऽन्यथः। यावद्वेति प्रतियोगि
तावच्छेदकेऽवच्छेदेन। तत्प्रतियोगितेति। सा चासौ प्रतियोगिता चेति विग्रहः। यत्प्रतियोगितेति।

सू.स.
१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सातेन संबंधेन व्यापकतावच्छेदकीभूतसत्तेनान्वयः। अत्र केवलान्वयिसाध्यके व्याप्यत्वलाघवप्रतियोगिक
यत्किंचिद्विशेषणतायामुभयाभाववत्त्वेन वा घटत्वादिनिष्ठप्रतियोगितायाः व्यापकतावच्छेदक
त्वानुपपत्तेरिति सामान्य इत्युक्तं। न चोभयाभावप्रतियोगितावच्छेदकरोधवाघदलनि
वेशप्रयोजनाभावः। यादृशप्रतियोगितावच्छेदकसंबंधसामान्ये इत्युक्ते केवलप्रतियोगि
ते स्वन्वयसंबंधभावादिति वाच्यं। घटत्वादिव्यापकतावच्छेदकत्वानुपपत्तेः। समवायादिनाति
त्वादिप्रतियोगितायां घटत्वादिव्यापकतावच्छेदकत्ववारणाय द्वितीयदलनिवेशः। एतावता
पूर्वोक्तेऽपि समवायेन संयोगादेः सत्ताव्यापकत्वापत्तिः। समवायसामान्ये संयोगप्रतियोगिक
त्वसत्ता च द्रव्यानुयोगिकत्वोभयाभाववत्त्वादिद्वितीयदले यत्किंचित्त्वनिवेशः। तथा च समवा
येन सत्तावद्गुणानुयोगिकत्वोभयाभावानसत्त्वान्नोक्तदोषः।
पदसामान्ये संयोगप्रतियोगिकत्वे सत्तावद्गुणानुयोगिकत्वे यत्किंचित्त्वस्यानुगततया विशेष्यता
अत्र व्यापकत्वनिवेशे गौरवं साध्यवत्तियत्किंचित्त्वस्यानुगततया विशेष्यता। संयोगेन द्रव्यत्वादे
धिकरणनिवेशेऽपि गौरवमिति कल्पान्तरमाह। यत्संबंधेनेति। प्रतियोगिवैय्य
र्वत्त्वादिव्यापकत्ववारणायाह। तेन संबंधेनेति प्रतियोगित्वनिवेशेति। घटत्वाद्य
धिकरणप्रवेशे गौरवात् लघुपेक्ष्य लघुप्रकारान्तरमाह तेनेत्यादि।

धाच्छिन्नद्रव्यत्वाभावप्रतियोगितायाः तदवच्छिन्नघटघटाभावीयप्रतियोगिताया वै
यधिकरण्येनावच्छेदकत्वाद्व्यापकतावच्छेदकत्वानुपपत्तिरत आह। सामानाधिकर
ण्येनेति। तथा। व्यापकतावच्छेदकत्वं। दैशिकविशेषणतासंबन्धेनेति। अभावीय वि
शेषणताविशेषेणेत्यर्थः। धूमवान् वह्नेरित्यादौ धूमाधिकरणपर्वतेऽपि सामान्ये त
दंबं। तथापि अधिकरणोत्पत्तिसंभावनायां चरमपक्षाधिकरणवृत्त्यभावस्य चरमवाति
रूपस्य कालिकतया साध्यवन्निष्ठाभावानेन ताद्दशाभावे दर्शितनिष्ठप्रतियोगिताया
व्यापकतावच्छेदकत्वस्याक्षततयाऽतिव्याप्त्यसंभवात्तद्दूषयन्नाह। तेनापि घट
इति। सामान्यतः घटपटान्यतरत्वावच्छिन्नौ स्वरूपेण घटस्य ध्वंसानन्तरं पटोत्पत्तिसं
भावनायां चरमपटान्यत्वाभावस्य तत्पटवृत्तिरूपादिस्वरूपतत्पटस्वरूपस्य कालि
कतया घटवृत्तित्वाभावेन तत्पटान्यत्वस्य घटत्वव्यापकत्वसंभवेन तदभावस्य ल
क्षणघटकतया नातिव्याप्तिः संभवतीति तत्प्रविष्टघटपटयोः समानकालीनत्वेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्याह। एतदुक्तेति। घटश्च पटश्च घटपटौ एतौ च तौ घटपटौ च एतद्घटपटौ नदन्यतादिसर्थः। घटत्वा
वपीति। तथा चैतत्पदान्यतराभावस्य कालिकतया साध्यवन्निष्ठतया व्यापकतानवच्छेदकप्र
तियोगितावत्वोक्तलक्षणानंतर्गततया घटत्वेन साध्यत्वाभावस्य लक्षणघटकतयाऽतिव्याप्ति
रिति भावः। नैतदिति। अभावीयविशेषणतया एतत्पदान्यतराभावस्य साध्यवन्निष्ठत्वा
भावेन तस्यापि लक्षणघटकत्वाभाव इति व्याप्तिरिति भावः। वह्निमान्धूमादित्यादौ साध्यवन्नि
ष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वात् यामपि प्रतियोगितायां व्यासज्यवृ
त्तिधर्मावच्छिन्नप्रतियोगितावच्छेदकभेदस्तेन व्यापकतावच्छेदकत्वापत्तेराह। अन
घ५ वच्छेदकत्वावच्छिन्नेति। एतस्याश्चावच्छेदकनिष्ठप्रतियोगिताया अर्थः कावच्छेदकपदार्थैकदे
प्रा६ शः प्रतियोगितायामन्वयः। तेन। अनवच्छेदक। भेदविवक्षणेन। अवच्छेदकत्वेनेति।
स५ अनवच्छिन्नप्रतियोगिताकत्वं तत्तीयार्थः। तस्य च घटादिभेदेऽन्वयः। तेन घटादिनि
त्वा ष्ठप्रतियोगितायामवच्छेदकत्वावच्छिन्नप्रतियोगिताकघटादिभेदत्वेन सर्वलाभः। न
च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकसंताभावस्य तत्रापि व्यधिकरणधर्माव
च्छिन्नप्रतियोगिताकान्योन्याभावे मानाभावेनेदमसंगतमिति वाच्यं। यदपि
स्यपी३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

करणधर्मावछिन्नप्रतियोगिताकासंसर्गाभावोऽङ्गीकर्त्तव्यः व्यधिकरणधर्मावछिन्नप्रतियोगिताका
न्योन्याभावस्यापि युक्तितौल्येनाङ्गीकारात् । यत्तु भविष्यति चैतच्छेत्रकवृत्तिलक्षणे । इत्य
लं वाहीति । सामानाधिकरण्येनावच्छेदकत्वोपपादनाय इत्यत्सोपादानं साध्यवृत्तित्वो
पपादनायेव तदुपादानं । ननु इदंत्वप्रतियोगितया घटत्वेन निखिलाभावप्रतियोगिताव
गाहे न स्वीक्रियते न तु इदंत्वेदिमानाभावात् । न च विशिष्टाभावः प्रतियोगिता
वछेदकावच्छिन्नप्रतियोगिताकेऽसहाभावस्याविरोधेन इत्यत्र निवृत्तिदशाप्रतीतेर्नापत्तेरे
वविनिगमकत्वादिति ... भावप्रतियोगितायाः सामानाधिकरण्येनावच्छेदक
त्वं तादृशप्रतियोगितानंगीक्रियत आह । प्रतीतिसिद्धेति । इत्यप्रतियोगित्वस्येन प्र
तीतिसिद्धेस्यैः । तथा चानुभवबलादेव द्रव्यत्वे सोपि तादृशाभावप्रतियोगि
तास्वीक्रियते इति भावः । अनवच्छेदकत्वेनादिः पर्याप्तिसंबंधावच्छिन्नावच्छेदकत्वा
भिन्नप्रतियोगितावच्छेदकतावछेदकलक्षणादिस्यैः । प्रकृतप्रतियोगितायां
तन्मात्रे । अन्यथा । तन्मात्रस्यावच्छेदकतापर्याप्त्यधिकरणत्वे । प्रसंगादिति । प्रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगितावच्छेदकतापर्याप्त्यधिकरणावच्छिन्नप्रतियोगिताकस्वैकैकाभाववन्निरोधादिति भावः। किंचि
ति। तथाचावच्छेदकत्वस्य व्यासज्यवृत्तितया स्वरूपसंबंधेनावच्छेदकताश्रयीभूतायामपि
घटत्वावच्छिन्नद्रव्यत्वाद्यभाववत्त्वे प्रतियोगितायां पर्याप्तिसंबंधेनावच्छेदकत्वस्य च तद्भेदस्य स
त्त्वान्न व्यापकतावच्छेदकत्वानुपपत्तिरिति भावः। नन्वेवं प्रतियोगिवैयधिकरण्याघटिते तथा व्या
पकतावच्छेदकत्वस्य कपिसंयोगाभावादिनिष्ठप्रतियोगितायां सत्त्वेन कपिसंयोगाद्या
समुदायाभावमादायात्रैकपिसंयोगाभाववान् प्रमेयत्वादित्यादौ दोषस्य मानाया: स्वविशिष्ट
पदयोरितरेतरसंगतिविरह इत्यत आह। यथा चैवं नामिति। तत्रैव। स्वविशिष्टपदव्यावर्त्यं प्रतिपा
दक्मंथ एव प्रपंचयिष्यत इत्यादिपदग्राह्यकारणाभावाभाववमादाय व्याप्तिरित्यादिप्रपं
चप्रकारस्तत्रैव व्यक्तीभविष्यति। यावत्सपदानुपादाने हेतुसमानाधिकरणेत्यादिपदानां
व्यावृत्तिर्न संगच्छते इति चरमोक्तस्यापि यावत्सपदस्य प्रथमं व्यावृत्तिर्दर्शिता सर्वत्रे
साधितोक्तेः। न च सर्वत्रैककिरणार्थिकां तां विनापि यावत्सपदव्यावृत्तिप्रदर्शनसंभवाद
त आह। यावत्सपदमिति। सर्वत्रैक[illegible]ने व्याप्तिव्यावृत्तिप्रदर्शनादाह। प्रदर्शि[illegible]तु मिति।

नेः

39

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वाधिकरणावच्छेदेनेति। इदं च तथा स्वादिसंबन्धि सर्वाधिकरणावच्छेदेन प्रतियोगि
ता... नाधिकरणपर्यन्तलक्षणेऽनिवेशेन तदुक्तिरसंगतेः सत्त्वात्। तथा चेति।
इतरस्यापीति। पायत्पदन्यूपादानेऽव्यावर्तकतया स्वविशिष्टहेत्वधिकरणावच्छेदेने
त्यस्योपादानं निष्प्रयोजनमपीति तत्सत्त्वप्रदर्शनस्यानौचित्येन तदुपादानानुप
गमपयादेन तत्सत्त्वप्रदर्शनस्य सूचनाकाविराङ्गोपादानं। तथा च स्वादिसंबन्धेन प्रा...
न पूर्वोपस्थित तत्त्वमित्यस्य परामर्शेऽसंगतिरतो व्याचष्टे। तथा लोदिति। सा यता
वच्छेदकावच्छिन्नेति। वह्निमान् धूमादित्यादौ धूमाद्यभावे समवायादिसंबन्धाव
च्छिन्नवह्न्यभावाभावसमानाधिकरणलक्षणसमन्वयः। एवं वा रूपवान् रसादौ धूमाद्यभा
वस्य हेत्वधिकरणेऽयोगोलकेऽप्रतियोगित्वात् सामानाधिकरण्यात्तिव्याप्तिः। न च
लघुरूपसमनियततागुरुरूपेण साध्यतापर्याप्तिः तत्र साध्यतावच्छेदकत्वं बाधि
च प्रतियोगिता साध्याभावप्रसिद्धेः पारिभाषिकावच्छेदकत्वनिवेशो च गौरव कृष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३२-मित्याशयः एतेनैतद्ग्रंथस्य साध्यतावच्छेदके त्वादिविशेषणव्यावृत्तिप्रदर्शकत्व ४२

मतमित्याह ॥ साध्यतावच्छेदकव्यापकेति कथं नोक्तमिति ॥ तथा च ॥ घटत्वेन वाच्यत्वाद्यभावस्य नि
रुक्तरूपकत्वाभावादेव वारणे यावत्त्वोपादानं व्यर्थमिति भावः ॥ यावत्त्वविशेषणादेवेति
॥ एवं चात एवेत्यादिग्रंथस्य यावत्त्वविशेषणव्यावृत्तिप्रदर्शकत्वं भ्रमवतां समुदायमा
त्रस्यानंतरमेव ग्रंथस्य कृत्वा व्यावृत्तिरूपं च्येतत्त्वमित्यादिदूषणं प्रावनं परास्तं ॥ वस्तुतस्तु ॥ ननु
पक्षत्वस्य नियामकसंबंधेन साध्यतायां हेतुसमानाधिकरणसाध्यतावच्छेदकावच्छिन्न
साध्यतावच्छेदकसंबंधघटितव्यापकतावच्छेदकप्रतियोगिताकत्वाया यावद्भावासिद्धिस्तथा
व्याप्यापाय त्वोपादानमसंगतमत आह दीधितौ सद्धेतौ । सद्धेतुमात्रे इत्यर्थः ॥ तथा तौ
त्रामिरुक्तविशेषणाक्रांतसोत्र । यावत्त्वोपादानं संगतमिति शेषः ॥ तथा च साध्यता
वच्छेदकसंबंधेन व्यापकत्वं न निविष्टमिति साराशः । ननु यावत्त्वोपादानमेव किमर्थमि
त्यत आह । अत एवेति । यावत्त्वोपादानादेवेत्यर्थ इति । यद्यालसर्वत्र सद्धेतौ न तत
था त्वाद्यति । सद्धेतुमात्रे लक्षणसमन्वय इति शेषः । यावत्त्वोपादानमत एवे
त्यस्यार्थः । अत एवेत्यस्य सद्धेतौ वाच्यत्वाद्यभावस्य तत्पात्वोदेवेत्यर्थः ॥ तथा च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यावत्योपादाने न सात्यवच्छेदकावच्छिन्नसाध्याभावमादाय सद्धेतौ अतिव्याप्तिनिरास इति
भावः। ननु भूतत्वमूर्तत्वोभयादिसाध्यके मूर्तत्वादौ हेतौ साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभा
वमादाय नातिव्याप्तिनिरास इत्यत आह भूतत्वमूर्तत्वोभयत्वादिरूपेण पर्यवसिदिति।
दीधितिव्याख्यानं रमणीयमिति प्रतिभाति। अथ तथापि। वह्निधूमोभयवान् वह्नेरित्यत्र
वह्निधूमोभयत्वावच्छिन्नाभावमादाय अतिप्रसंगासंभवे यद्दीधितिकृतः रूपं परिसामाड इति चेन्न। अ ततः
रोरूपनिरुक्तव्याप्यादिति दिक्। अथ धूमस्य हेतुत्वसमानाधिकरणाभावसंपादनेन कारीभनुसं धेयं। बहिरिदि
येत्यादि। आत्मनि अतिप्रसंगवारणाय बहिरिति। परमाणावव्याप्तिवारणाय गन्धाद्यजी
तीयेति। संयोगादिवारणाय विनोबेति। साध्यप्रतियोगिकाभावमादायातिव्याप्तिवारण
संबन्धेन साध्यप्रतियोगिकस्याभावमादाय तद्धारणस्य निष्प्रयोजनत्वमित्यस्वरसादाह वे
चिदितिति। प्रसिद्धपरिभाषाबीजमाह वह्निमानिति। संयोगेन वृत्तिनियामकसंयोगेन।
प्राचीनमते तस्यैवाहेतुतावच्छेदकसंबन्धत्वात्। एवमग्रेऽपि। प्रतियोगीति। परमा
णोः दिक्पाधितया। दैशिकसंबन्धेन महत्त्वकालादौ कालिकसंबन्धेनेत्यादि। परमा
णौ धूमइति। वृत्तिनियामकसंयोगेन साध्यताभावसाध्यविशेषप्रागुक्तिरनुसरणं।

कृष्ण
१९

वन्नौचित्यादिति। निश्चितदोषवारणायैव सर्वत्र विशेषणदानात् तद्दलितभावः। साध्याभा
वस्याव्याप्यवृत्तित्वे तस्य प्रतियोगितावैयधिकरण्याघटितत्वव्यापकतावच्छेदकप्रतियो
गिताकत्वाभावेन लक्षणाघटकत्वमित्यस्वरसादाह। केचित्त्विति। सत्त्ववानिति।
जन्यमात्रस्य कालोपाधित्वाभावे धूमवान् वह्नेरित्यादावतिव्याप्त्यसंभवौ तत्परिहारः।
अव्याप्तिश्चाति त्वस्य व्याप्तित्वे केवलव्यभिचारिणस्यालक्ष्यत्वमिति मतमनुमताकालत्वस्यैतल्लक्ष्यत्वे
मेवेत्याशयादाह। आत्ममते ताकालान्तरत्वादिति। काल इति। आत्मनो वृत्तित्वादित्यादि
अन्यथा। आत्मनः कालसंबन्धित्वे कारणत्वादिकमिति। आदिना चिरतनत्वपरिग्रहः।
तत्स्वरूपदानत्वादेः। कालवृत्तित्वेति। अकालसंबन्धित्वे सर्पः। सदातनत्वकारणत्वयोः
सर्वकालसंबन्धित्वान्यथासिद्धनियतपूर्वकालसंबन्धित्वरूपत्वादिति भावः। सदा
तनत्वस्य ध्वंसप्रागभावाप्रतियोगित्वरूपतया कारणत्वं च तत्पूर्ववृत्तित्वं सच्चाप
वृत्तिकालवृत्तिध्वंसप्रागभावाप्रतियोगित्वरूपत्वात् नोक्तदोषप्रसक्तिरित्याह। एवमपीति।
कालस्यात्मसंबन्धित्वेऽपि सर्पः। अत्र। एतदुक्तविवरणे। वृत्तेः संबन्धित्वात्
तेन। साध्यतावच्छेदकसंबन्धेनेति। विवक्षणेन धूमादालीनवह्नेरपि हेतुत्वे सं

38

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ.दी.ख.
२०

स्व.

संबंधसामान्येन धूमनिष्ठव्याप्यताऽनिरूपितव्यापकताघटकसंबंधसामान्ये नापि धूमा
भावस्य प्रतियोगिसामानाधिकरण्यं न संभवति धूमाद्यालीनत्वाधिकरणे धूमस्य
कृ नापि संबंधेनासत्त्वादत आह। धूमवद्वृत्तीनत्वेनेति। न क्षतिः। नातिव्याप्तिः।
व्यापकताघटकत्वेन व्यापकताघटकत्वप्रसिद्धिसंबंधेन। एतस्य वृत्तित्वादिसंबंधेने
सत्त्वापदे नान्वयः। साध्यतावच्छेदकवह्नित्वे समस्यावृत्तिमत्त्वेति। व्या
पकतायां वारकप्रवेशे गौरवादाह। वस्तुतस्त्विति। व्यापकेति। स्वातन्त्र्येणाव्या
दि। स्वातन्त्र्येण व्यापकताघटकत्वेन संबंधानां प्रतियोगिसामानाधिकरण्यघटक
तयाप्रवेशे गौरवादिति भावः। व्यापकताघटकत्वविषघितपेति। यत्तु केचन विष
यितायाः वस्तानिरूपकत्वे तदवच्छिन्नप्रतियोगितायामप्रसिद्ध्या विष[illegible]विता
मा: व्यापकत्वस्य घटकत्वे तत्त्वादि[illegible]दुपलसातामिति दूषणं तदसत्। प्रचा
[illegible]मते [illegible]समनियतसंबंधस्यादिप्रतियोगितावच्छेदकत्वात्। ग्रन्थविरोध इ
ति। नान्यत्वादेः संयोगादिनाऽसाध्यतावच्छेदकसंबंधेनाव्यापकत्वादिति भावः।

[illegible]
२०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ननु सर्वत्रैव साध्यत्वं यस्य यस्य तस्य तस्याभावत्वात् प्रमेयत्वात् इत्यादौ स्वरूपसंबंधेन साध्यतायां सति व्याप्तिः परत्वात् नाति
दोष इत्यत आह । यत्रेति । तादृशसाध्याभावानां साध्यतावच्छेदकसंबंधघटितसाध्यव्यापकतावच्छेदकप्रतियोगितानां
मति व्याप्तिश्चेति । मता कालान्यतावत्त्वस्याभिमतत्वात् कालिकत्वप्रतियोगिसामानाधिकरण्यादिति
भावः । व्यवस्थापयिष्यत इति । सिद्धान्तलक्षण इत्यादि । व्यवस्थापनप्रकारश्च तत्रैव स्फुटीभविष्यति ।
तथा च तत्स्थले कालत्वं स हेतुरेवातो नाति व्याप्तिरिति भावः । इदं च सिद्धान्तलक्षणे न्यूनत्वव्याप्ति
रिक्तस्य व्याख्यानावसरे व्याख्यानाय तत्र केचिदिति मतमुपन्यसनीयं तदभिप्रायेण । तन्मतप
वता दृशाव्यवस्थापनात् । स्वयं स्वातन्त्र्येण दीधितिकारेण वा व्यवस्थापनात् यादृशक्रमेणेति । एत
द्रूपान्यत्वस्य समवायेनाव्याप्यवृत्तया तदभाववत्त्वलक्षणघटत्वं सा व्याप्यभावस्य समवायेन
गुणादौ प्रतियोगिसामानाधिकरण्यमस्त्येवेत्याशयः । अव्याप्तिः । व्याप्यत्वं । असंभव इति
यावत् । सर्वत्र व्याप्तिकरणत्वं सर्वत्र व्याप्यवच्छिन्नाभावत्वमादाय लक्षणासत्त्वात् इति भावः । वह्नि
मान् धूमादित्यादौ कालिकादिसंबंधेन हेतुसमानाधिकरणद्रव्यत्वादेः समानाधिकरणप्र
मीनाधिकरणाभावमादायैव लक्षणसत्त्वादाह । इदं वाच्यमिति । ननु घटत्वेन वाच्यत्वाभाव
एव प्रसिद्ध इत्यत आह । व्यधिकरणेति । तादृशस्येति । तथा च समानाधिकरणधर्मावच्छिन्ना
भावमादायैव लक्षणं समन्वयमिति भावः ।। वक्ष्यमाणाभ्यस्वरसादाह वस्तुतस्त्विति । अनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भववत्त्वादिति। संयोगेन घटत्वेन पटो नास्तीत्याद्यनुभवबलादित्यर्थः। अन्यथा संयोगेन घटो नास्तीत्या
द्यनुभवबलात् समानाधिकरणधर्मावच्छिन्नाभावस्यापि प्रतियोगितावच्छेदकसंबंधाप्रसिद्धि
संगादिति भावः। ननु अनुभवबलान् समानाधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावं ता ३
च्छेदकसंबंधादरः। किंतु बाधबुद्धिप्रतिबंधकतायाः संबंधविशेषनियंत्रितत्वानु
रोधेनैव अन्यथा एकैव विशिष्टघटाभावस्य ज्ञानस्य संयोगसमवायादिनिखिलसंसर्गावगा
हिज्ञानप्रतिबंधकत्वप्रसंगादित्याशंकायां तु त्वं प्रकृतेपीत्याह। कथमन्यथेति। उपपद्यते इ
त्यनेनान्वयः। पूर्वकल्पे स्वरसप्रकाशमाह। अत एवेति। व्यधिकरणधर्मावच्छिन्नाभावस्य प्र
तियोगितावच्छेदकसंबंधांगीकारादेवेत्यर्थः। अप्रतीकारादिति। तत्र साध्याप्रकृतावच्छेद
कत्वावच्छिन्नप्रतियोगिताकाभावस्य निवेशेनाविशिष्टव्याप्तेलाघवभावमादायतद्दूष
णदानासंभवादिति भावः। आकृतिमि। अत्रोक्तयुक्त्या व्यधिकरणधर्मावच्छिन्नाभावस्योने
तत्संबंधावच्छिन्नप्रतियोगिताकत्वाविषयकत्वेनैव प्रतिबंधकत्वेन तत्सिद्धावपि प्रमा
ण तु सिद्धभावेन व्यधिकरणधर्मावच्छिन्नाभावे वस्तुगत्या तत्संबंधावच्छिन्नप्रतियो
गिताकत्वासिद्धिः। नन्वेदं समानाधिकरणधर्मावच्छिन्नाभावेपि स्तु न चाभिहितिवाच्यं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रप्रतियोगितावच्छेदकविशिष्टप्रतियोगितद्भावयोर्विरोधनिर्वाहाय प्रतियोगितावच्छेदकसंबंधस्यावच्छे
दकत्वादिसस्वरसः। इत्थं तादृशाभावस्य विशेषणताविशेषे प्रतियोगिसामानाधिकरण्याभावाद्व्या
वृत्तेः विशेषणताविशेषेण व्याप्यकत्वेति। व्यभिचारिणि व्यभिचारनिरूपकाधिकरणान्यतोभाव
स्याभावीय विशेषणतया पूर्वक्षणवृत्तित्वविशिष्टस्वाभावादिरूपप्रतियोगिसामानाधिकरण्या
दतिव्याप्तिरत आह प्रमाविषयत्वीयेति। सद्धेतौ घटत्वादिना गगनाभावाभावं गगनाद्यभा
वप्रकारकप्रमाविषयत्वाभावं चादाय लक्षणसमन्वयः। ननु प्रमाविषयत्वस्याव्याप्यवृत्तित्वेन
सर्वनाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य कपिसंयोगाभावप्रकारकप्रमाविशेष्यत्वाभाव
स्याप्रसिद्धलक्षणाघटकतयादास्यमानस्य विशेष्यपदव्यावर्त्यस्यासंभवात्तदसंगतिरत आह। अव्याप्येति। अव्या
प्यवृत्तेरेवेति। तथा च तस्याप्रसिद्धलक्षणाघटकतया नोक्तदोषइति भावः। प्रतियोगित्वे यावधिकर
ण्यावृत्ति तद्व्यापकतापक्षे कृतौ साध्यविशेषपदव्यावृत्तिर्नसंगच्छतेऽस्मत आह सत्तावानिति।
सत्ताप्रकारेति। एतस्य विशेष्यतया गुणेत्यादिविशेषणेऽन्वयः। अत्रात्मत्वाद्यभावमादायैवे
तिप्रवर्तने धस्याभोगगनाद्यभावस्येति तिरथ्यस्य च विरोधोऽस्वरसः। अव्याप्तिरिति। साध्याभा
वरूपसामान्याभावाभावस्य रूपप्रागभावाद्यात्मनः सर्वस्यैव रूपाद्यात्मकप्रतियोगिसामाना

ति २

प.का.टि.रू.
२२

स्व०

ननु पृथिव्यां रूपसामान्याभावस्याऽसत्त्वेन रूपसामान्याभावव्यापकत्वं पृथिव्यन्यत्वादेरभावस्य हेत्वधि-
करणावच्छेदेन प्रतियोग्यसामानाधिकरण्याभावान्न व्याप्तिरित्यत आह पृथिव्यन्यत्वादेरिति। स्वमते।
शिरोमणिमते। रूपसामान्याभावव्यापकत्वादिति। वक्ष्यमाणरीत्या रूपसामान्याभावस्य पृ-
थिव्यामपि सत्त्वेन पृथिव्यन्यत्वस्य साध्यव्यापकत्वादिति भावः। अतः। इत्याशङ्कातः। अत ए-
वेत्यनेन तस्मिन्नेवेत। कृत्स्नस्येत्यनेनात्र तत्कल्पने संभवदर्थानुव्याप्तसंग्रहातिरिक्तस्य रसादेः।
केचिदिति। रूपस्य रूपप्रतिबन्धकत्वेन रूपनाशोत्पत्तिकाले रूपान्तरोत्पादासंभवेन प्रलय-
पर्यन्तानुधावनस्य वैयर्थ्यमत आह विनश्यदवस्थेति। सामग्री व्याप्तेरूपस्य घटितायाः
एव रसादिकारणत्वात् रूपोत्पत्तिकारणे रूपं प्रति रूपस्य प्रतिबन्धकत्वे मानाभावादि-
त्याशयेनाह। प्रतिबन्धकत्वं नोपगममिति। परमाणाविति। रूपनाशोत्पत्तिकालावच्छेदेन
सर्गादि। सर्गादिकाले द्व्यणुकरूपोत्पत्त्यर्थं खण्डप्रलये परमाणौ पूर्वसर्गोत्पन्नस्यैव रूप-
स्य स्वीकार आवश्यकः। अन्यथा तत्र रूपनाशे रूपान्तरोत्पादयोः कल्पने गौरवादित्या-
शयेनाह। महाप्रलय इति। तत्र परमाणुरूपस्य नित्यत्वादाह। पार्थिवेति। षष्ठीति। प्र-
तियोगिन इत्यर्थः। तथा च रूपध्वंसहेतुत्वमित्याशयः। ननु प्रत्यक्षाभावेप्यनुमानमेव

रूस
२२

43

मानं स्यादत आह। अनुमानस्येति। बाधकमप्याह। प्रसक्तेति। हेतुसंगत्यादिति। द्रव्यसमवेतरूपसभा
वप्रत्यक्षे सावच्छेदेनेत्यादि। उत्पत्तिकालेति। उत्पत्तिकाले घटे तत्तत्त्वेन द्वितीयक्षणे तत्का
लावच्छेदेन घटे रूपं नास्तीति प्रत्यक्षं संभवतीति भावः। द्रव्येति। इंद्रियान्यद्रव्ये समर्थः। तेन
रूपाभावप्रत्यक्षेण व्यभिचारः। संयुक्तेति। इंद्रियसंयुक्ते समर्थः। न तु घटादिवत्सभावप्रत्य
क्षे इंद्रियसंयुक्तसमवेतविशेषणतायाः हेतुत्वेन प्रकृतासिद्धिरत आह। विनिगमने
ति। घटादिवत्सभावप्रत्यक्षे इत्यादि। उभयहेतुतायामपि भपिरवधारणे। तथा च घटादिव
त्सभावप्रत्यक्षस्योभयप्रयोज्यतायाः छेदकत्वात् तथा तत्रोभयहेतुत्वमावश्यकमिति भा
वः। प्रकृतासिद्धेः। अवयविनि उत्पत्तिकाले रूपसामान्याभावस्य प्रत्यक्षेणासिद्धेः।
न तदपेक्षेतीति। तथा च ध्वंसप्रागभावयोरसत्ताभावविरोधित्वेन तदा स्यामे घटे रूपा
पत्त्या नास्तीति प्रसत्यानुपपत्तिरिति। तयोर्विरोधे उक्तलाघवस्याकिंचित्करत्वात् त
यारविरोधे इति रिक्तासत्ताभावकल्पनारूपगौरवस्य प्रामाणिकत्वेन प्रतिकूलतर्क
स्यापि बैनोक्तप्रसत्यानुपपत्तिरूपानुकूलतर्कस्याविसत्त्वेनोक्तरीत्यानुमानमे
वप्रत्यये परमाणाकुत्पत्तिकाले अवयविनि रूपसामान्याभावसत्त्वे प्रमाणमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सावच्छेदकत्वार्थः। रक्तरूपप्रतियोगिकाभावमात्रस्य विषयकप्रत्यक्षस्योपपत्तेरित्याह। निरुक्तलक्षणवि
षयत्वेति। रक्तरूपत्वावच्छिन्नप्रतियोगिताकत्वावगाही सर्वः प्रतिबध्यक इति। रक्त
वत्ताज्ञाने तदेव प्रतिबन्धकमन्यथा भ्रमात्मकत्वाद्व्यासज्यमानत एवेत्याशयः। अत
एवाह प्रमात्वाभावादिति। रक्तत्वावच्छिन्नेति। अत्रैवान्ये तु तस्येत्यादि। एतच्च स्वच्छन्नाप्या
पीति। अपि नायं किंचिन्न विशेषे साधुत्वे स्वचनपरिग्रहः। तेनेन। हेतुतावच्छेदकसंबंधो
पादानेन। हेतुतावच्छेदकभिन्निष्ठसस्याप्यावश्यकमाह। नचेति। चरमधूमाधिकरणध्वं
सस्य कालेदेशे च वर्त्तिते न तदधिकरणकालदेशयोरेकतरमात्रवृत्तितदेकतर
त्वावच्छिन्नभेदाभावे चरमधूमाधिकरणध्वंसात्मकत्वं न संभवतीत्याशयेनाह। त
दन्यतरत्वेति। चरमधूमाधिकरणध्वंसात्मक इति। ननु तद्धर्मावच्छिन्नभेदाभावस्य
तद्धर्मात्मकतया तदन्यतरत्वावच्छिन्नभेदाभावस्य तदन्यतरात्मकत्वेन चरमधू त्वा
माधिकरणध्वंसात्मकत्वमपि तिचेतामेवं। तस्य तदन्यतरत्वात्मकत्वेऽपि तद्धर्मा
वच्छिन्नाभिन्नभेदस्यापि तद्धर्मात्मकत्वेन चरमधूमाधिकरणध्वंसाधिकरणभि
न्नभेदात्मकस्य चरमधूमाधिकरणध्वंसात्मकत्वे तस्य चरमधूमाधिकरणध्वं कस्य

२३

HS

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सात्मकत्व एव पर्यवसानेन तथाभिधानात्। पर्वतादेः कालोपाधित्वात् क्वचिदपि महाकाले
ऽन्यत्वाघटाभावस्य प्रतियोगिसामानाधिकरण्यादिति व्याप्तिः संभवत्येवेत्यस्वरसादा
ह। कश्चिदिति। साध्येति। हेतुतावच्छेदकालिकेनान्यत्र दैशिकेन संबन्धेनेति बोध्यं। तेन।
कालिकसंबंधस्य सर्वत्र साध्यताघटकत्वेन। अन्यथा दैशिकसंबंधस्य साध्यताघट
कत्वे दैशिकसंबंधस्यैव व्यापकताघटकत्वेन तेन संबंधेन प्रतियोगिसामानाधिक
घ६ रण्याभावेन जन्यद्रव्यत्वावच्छिन्नाभावमादायातिव्याप्तिवारणसंभवतीति तत्रे
